# दीपशिखा

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागस्य ई-पत्रिका

## तृतीयः अङ्कः

(अक्टोबर, २०२२)



jls

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागस्य ई-पत्रिका)

**तृतीयः अङ्कः**

(अक्टोबर, २०२२)

उपदेष्टा

**स्वामी आत्मप्रियानन्दः**

मुख्यसम्पादकः

**डॉ. राकेशदाशः**

सम्पादनसहायकाः

**ब्रह्मचारी शुभदीपः**
**शान्तनुनायेकः**

संस्कृतदर्शनविभागः

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्

बेलुडमठम्, हावडा, पश्चिमवङ्गः ७११२०२

# सूची


| क्रमः | प्रबन्धः (पठितुं शीर्षकं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | १ |
| २. | स्वामिविवेकानन्दकृतं श्रीरामकृष्णस्तोत्रम् (पदच्छेद-अन्वय-प्रतिपदार्थ-सरलार्थ-सहितम्) | डॉ. राकेशदाशः (व्याख्याता) | २ |
| ३. | महेन्द्रनाथगुप्तकृतम् श्रीरामकृष्णकथामृतम् (अंशविशेषस्य अनुवादः) | स्वामी वेदार्थानन्दः (अनुवादकः) | ८ |
| ४. | श्रीशिवमाहात्म्यम् (पद्यकाव्यम्) | प्रलयनन्दी | ११ |
| ५. | नीलमाधवः | शुभजित् दासः | १२ |
| ६. | आरोही (आख्यायिका) | शान्तनुनायेकः | १४ |
| ७. | मातुः क्रन्दनम् (आख्यायिका) | शुभङ्करदासः | १७ |
| ८. | स्वामिसारदानन्दकृतः श्रीरामकृष्णलीलाप्रसङ्गः (अंशविशेषस्य अनुवादः) | डॉ. राकेशदाशः, शान्तनुनायेकः (अनुवादकौ) | १९ |

# सञ्चारिणी दीपशिखा

विश्वविद्यालयस्य प्रतिकुलाधिपतीनां पूज्यानां श्रीमताम् आत्मप्रियानन्दस्वामिचरणानां प्रेरणया, संस्कृतदर्शनविभागाध्यक्षाणां श्रीमतां जपसिद्धानन्दमहाराजानां प्रबन्धनेन च अस्याः पत्रिकायाः प्रारब्धायाः वर्षाणां पञ्च व्यतीतानि। आद्ययोः अङ्कयोः निर्गतयोः अस्याः पत्रिकायाः प्रकाशनस्रोतः विविधकारणैः स्तब्धम् आसीत्। ऐषमः पुनः इयं पत्रिका प्राकाश्यम् एति। पत्रिकायाः प्रकाशने विशिष्टः सहभागः वर्तते ब्रह्मचारिणः शुभदीपमहाराजस्य तथा च संस्कृतदर्शनविभागीयस्य शोधच्छात्रस्य श्रीमतः शान्तनुनायेकस्य। अत्र पत्रिकायां पूर्वं सङ्कलितानि एव वस्तूनि प्राकाश्यम् अयन्ते। अत्र वैशिष्ट्यम् इदं यत् श्रीरामकृष्णकथामृतस्य तथा श्रीश्रीरामकृष्णलीलाप्रसङ्गस्य अंशतः संस्कृतानुवादः अत्र विराजते। परमपुरुषं कामयामहे यथा अस्याः पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं स्थेयात्। सर्वेभ्यः पाठकेभ्यः, संस्कृताभिमानिभ्यः निवेदनम् इदं यत् अस्यै पत्रिकायै स्वलिखितानि काव्यानि गद्यपद्यात्मकानि, अनूदितान् अंशान्, निबन्धान् च निःसङ्कोचं प्रेषयन्तु इति।

मुख्यसम्पादकः

# स्वामिविवेकानन्दकृतं श्रीरामकृष्णस्तोत्रम्

(तस्मात् त्वमेव शरणं मम दीनबन्धो)

( पदच्छेदान्वयपदार्थभावार्थसंवलितम् )

डॉ. राकेशदाशः

ॐ ह्रीम् ऋतं त्वमचलो गुणजिद् गुणेड्यो
नक्तन्दिवं सकरुणं तव पादपद्मम् ।
मोहङ्कषं बहुकृतं न भजे यतोऽहं
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥१ ॥

**पदच्छेदः–** ॐ ह्रीम् ऋतं त्वम् अचलः गुणजित् गुणेड्यः नक्तं-दिवं सकरुणं तव पादपद्मम्। मोहङ्कषं बहुकृतं न भजे यतः अहं तस्मात् त्वम् एव शरणं मम दीनबन्धो ॥

**अन्वयः–** त्वम् ॐ ह्रीम् ऋतम् अचलः गुणजित् गुणेड्यः। यतः अहं तव मोहङ्कषं बहुकृतं पादपद्मं सकरुणं न भजे तस्मात् हे दीनबन्धो त्वम् एव मम शरणम् (भवसि)।

**पदपरिचयः–**

| | | |
|---|---|---|
| त्वम् | – | [युष्मद्] (कर्तरि, प्रथमायाम् एकवचनम्) |
| ॐ | – | [अव्ययम्] |
| ह्रीम् | – | [शक्तेः देव्याः वा बीजाक्षरम्] |
| अचलः | – | [न चलः अचलः (नञ्तत्पुरुषः)[१]] (विशेषणम्। प्रथमायाम् एकवचनम्) |
| गुणजित् | – | [गुणं जयति। गुण (उपपदम्) √जि+क्विप् (उपपदसमासः)=गुणजित्[२]] (विशेषणम्। प्रथमायाम् एकवचनम्) |
| गुणेड्यः | – | [गुणेन ईड्यः गुणेड्यः (तृतीयातत्पुरुषः)[३]। ईड्य= √ईड्+ण्यत्[४]। गुणेड्य] (विशेषणम्। प्रथमायाम् एकवचनम्) |
| यतः | – | [अव्ययम्। यद्+तसिल्] |
| अहं | – | [अस्मद्] (कर्तरि, प्रथमायाम् एकवचनम्) |
| तव | – | [युष्मद्] (सम्बन्धे षष्ठ्याम् एकवचनम्) |
| मोहङ्कषं | – | [मोहं कषति। मोह(उपपदम्) √कष+खच् (उपपदसमासः)=मोहङ्कष[५]] (विशेषणम्। द्वितीयायाम् एकवचनम्) |

[१] नञ् (अष्टाध्यायी २.२.६)

[२] उपपदम् अतिङ् (अष्टाध्यायी २.२.१९)। सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजां उपसर्गेऽपि क्विप् (अष्टाध्यायी ३.२.६१) इति सूत्रेण जि-धातोः क्विप् प्रत्ययः

[३] कर्तृकरणे कृता बहुलम् (अष्टाध्यायी २.१.३१)

[४] ऋहलोर्ण्यत् (अष्टाध्यायी ३.१.१२४)

[५] उपपदम् अतिङ् (अष्टाध्यायी २.२.१९)। सर्वकूलाभ्रकरीषेषु कषः (अष्टाध्यायी ३.२.४२) इति सूत्रेण सर्व-कूल-अभ्र-करीष-इत्येतेषु उपपदेषु एव कषधातोः खच् भवति। किन्तु, अत्र मोह इत्यस्मिन् उपपदे अपि बाहुलकात् खच् क्रियते।

बहुकृतं – [बहु कृतं येन (बहुव्रीहिसमासः)[६]। बहुकृत] (विशेषणम्। द्वितीयायाम् एकवचनम्)
पादपद्मं – [पादः पद्मम् इव पादपद्मम् (उपमानोत्तरपद-कर्मधारयः)[७]। पादपद्म] (कर्मणि द्वितीयायाम् एकवचनम्)
सकरुणं – [सह करुणया सकरुणम् (बहुव्रीहिः)[८]। सकरुण] (क्रियाविशेषणे द्वितीया)
न – [अव्ययम्]
भजे – [√भज्] (लटि (वर्तमानकाले) उत्तमपुरुषे एकवचनम् (आत्मनेपदम्))
तस्मात् – [तद्] (हेतौ[९] पञ्चम्याम् एकवचनम्)
हे – [अव्ययम्]
दीनबन्धो – [दीनस्य बन्धुः दीनबन्धुः (षष्ठीतत्पुरुषः)[१०]। दीनबन्धु] (सम्बोधने प्रथमायाम् एकवचनम्)
त्वम् – [युष्मद्] (कर्तरि प्रथमायाम् एकवचनम्)
एव – [अव्ययम्]
मम – [अस्मद्] (सम्बन्धे षष्ठ्याम् एकवचनम्)
शरणम् – [शरण] (विधेयविशेषणम् प्रथमायाम् एकवचनम्)

**पदार्थाः–** त्वम् ॐ (ॐकारस्वरूपः) ह्रीम् (ह्रीङ्कारस्वरूपः) ऋतं (सत्यस्वरूपः अनादिनिधनः) अचलः (कूटस्थः, नित्यः) गुणजित् (सत्त्वरजस्तमोनामकस्य गुणत्रयस्य जेता), गुणेड्यः (माहात्म्येन स्तवनीयः)। यतः (यस्माद्) अहं तव मोहङ्कषं (मोहनाशकं) बहुकृतं (प्रचुरकार्यसम्पादकं) पादपद्मं (चरणारविन्दं), सकरुणं (व्याकुलतया) न भजे (न वन्दे), तस्मात् (ततः) हे दीनबन्धो (अनाथस्य बान्धव), त्वम् एव मम शरणम् (आश्रयः)।

**भावार्थः–** ॐकारस्वरूपः, ह्रीङ्कारस्वरूपः, सत्यस्वरूपः, अनादिनिधनः, कूटस्थः, नित्यः, सत्त्वरजस्-तमोनामकस्य गुणत्रयस्य जेता, माहात्म्येन स्तवनीयः त्वम् (श्रीरामकृष्णः)। यस्माद् अहं तव मोहनाशकं सृष्टिस्थित्यादिबहुकार्यसाधकं चरणारविन्दं व्याकुलतया न वन्दे ततः हे अनाथस्य बान्धव, त्वम् एव मम आश्रयः, उद्धारकर्ता भवसि।

भक्तिर्भगश्च भजनं भवभेदकारि
गच्छन्त्यलं सुविपुलं गमनाय तत्त्वम्।
वक्त्रोद्धृतन्तु हृदि मे न च भाति किञ्चित्

[६] अत्र वस्तुतः निष्ठा (अष्टाध्यायी २.२.३६) इति सूत्रेण कृत इति निष्ठाप्रत्ययान्तस्य पूर्वनिपातः स्यात्। किन्तु, जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः (अष्टाध्यायी ६.२.१७०) इत्यत्र अकृत इति पर्युदासाद् ज्ञायते यत् कृतशब्दस्य पूर्वनिपातः विकल्पेन भवति इति। अधिकं जिज्ञासवः निष्ठा इति सूत्रस्य भाष्यं, प्रदीपम्, उद्योतं, बहुव्रीहेश्चान्तोदात्तात् (अष्टाध्यायी ४.१.५२) इति सूत्रस्य भाष्यं प्रदीपं च तथा सिद्धान्तकौमुद्यां जातिकालेत्यादिसूत्रं परिशीलयन्तु।
[७] विशेषणं विशेष्येण बहुलम् (अष्टाध्यायी २.१.५६)
[८] तेन सहेति तुल्ययोगे (अष्टाध्यायी २.२.२८)
[९] विभाषा गुणेऽस्त्रियाम् (अष्टाध्यायी २.३.२५)
[१०] षष्ठी (अष्टाध्यायी २.२.८)

तस्मात्त्वमेव शरणं मम दीनबन्धो ॥२ ॥

**पदच्छेदः–** भक्तिः भगः च भजनं भवभेदकारि गच्छन्ति अलं सुविपुलं गमनाय तत्त्वम्। वक्रोद्धृतं तु हृदि मे न च भाति किञ्चित् तस्मात् त्वम् एव शरणं मम दीनबन्धो ॥

**अन्वयः–** भक्तिः भगः च भजनं भवभेदकारि। सुविपुलं गमनाय तत्त्वम् अलं (गन्तुम्) गच्छन्ति (इति) वक्रोद्धृतं तु हृदि मे न च किञ्चित् भाति। तस्मात् हे दीनबन्धो त्वम् एव मम शरणम् (भवसि)।

**पदपरिचयः–**

| | | |
|---|---|---|
| भक्तिः | – | [√भज्+क्तिन्, भक्ति] (कर्तरि प्रथमायामेकवचनम्) |
| भगः | – | [भग] (कर्तरि प्रथमायाम् एकवचनम्) |
| च | – | [अव्ययम्] |
| भजनं | – | [√भज्+ल्युट्, भजन] (कर्तरि प्रथमायाम् एकवचनम्) |
| भवभेदकारि | – | [भवस्य भेदः भवभेदः (षष्ठीतत्पुरुषः) भवभेदं कर्तुं शीलम् अस्य। भवभेद (उपपदम्) √कृ+णिनि [11] (उपपदसमासः)। भवभेदकारिन्] (विधेयविशेषणम्। प्रथमायाम् एकवचनम्) |
| गमनाय | – | [√गम्+ल्युट्, गमन] (अलम् इति शब्दस्य योगेन चतुर्थ्याम् एकवचनम्। [12]) |
| अलं | – | [अव्ययम्] |
| सुविपुलं | – | [अतीव विपुलं सुविपुलम् (प्रादिसमासः) [13]। सुविपुल] (विशेषणम्। कर्मणि द्वितीयायाम् एकवचनम्) |
| तत्त्वम् | – | [तद्+त्व, तत्त्व] (कर्मणि द्वितीयायाम् एकवचनम्) |
| गच्छन्ति | – | [√गम्] (लटि (वर्तमानकाले) प्रथमपुरुषे बहुवचनम्) |
| वक्रोद्धृतं | – | [वक्रेण उद्धृतम् (तृतीयातत्पुरुषः) [14]। वक्रोद्धृत] (कर्तरि प्रथमायाम् एकवचनम्) |
| तु | – | [अव्ययम्] |
| हृदि | – | [हृदय] (अधिकरणे सप्तम्याम् एकवचनम्) [15] |
| मे | – | [अस्मद्] (सम्बन्धे षष्ठ्याम् एकवचनम्) |
| न | – | [अव्ययम्] |
| च | – | [अव्ययम्] |
| किञ्चित् | – | [अव्ययम्] |
| भाति | – | [√भा] (लटि (वर्तमानकाले) प्रथमपुरुषे एकवचनम्) |

**पदार्थाः–** भक्तिः (ईश्वरपरायणता), भगः (वैराग्यादिसाधनानि) भजनम् (उपासनादिकम्), गमनाय (परमार्थप्राप्तये) अलं (पर्याप्ताः)। (एतैः भक्त्यादिभिः मोक्षकामिनः) भवभेदकारि (संसारमोचकं) सुविपुलं (महत्तमं) तत्त्वं (ब्रह्म, मोक्षं) गच्छन्ति (प्राप्नुवन्ति)। (इति ईदृशं वाक्यं) तु (किन्तु) वक्रोद्धृतं

[11] सुप्यजातौ णिनिस्ताच्छील्ये (अष्टाध्यायी ३.२.७८)

[12] नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च (अष्टाध्यायी २.३.१६)

[13] कुगतिप्रादयः (अष्टाध्यायी २.२.१८)

[14] कर्तृकरणे कृता बहुलम् (अष्टाध्यायी २.१.३९)

[15] पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (अष्टाध्यायी ६.१.६३) इति सूत्रेण हृदयशब्दस्य स्थाने हृद् इति आदेशः

(केवलं मुखेन उच्चारितं) मे (मम) हृदि (हृदये) च (किन्तु) किञ्चित् (स्वल्पम् अपि) न भाति (प्रतीयते)। तस्मात् इत्यादि पूर्ववत्।

**भावार्थः–** हे प्रभो, भक्तिः वैराग्यादीनि कल्याणसाधनानि ईश्वरस्य उपासनं च परमार्थतत्त्वस्य प्राप्तये समर्थम्। एतानि आश्रित्य साधकाः तद् सुमहद् ब्रह्मतत्त्वं प्राप्नुवन्ति, मोक्षं च अधिगच्छन्ति। एतत् सर्वं मया मुखेन उच्चार्यते, किन्तु मम हृदये तत् सर्वं स्वल्पेन अपि प्रमाणेन न भासते। तस्मात् त्वम् एव मम आश्रयः, उद्धारकर्ता भवसि।

तेजस्तरन्ति तरसा त्वयि तृप्ततृष्णा
रागे कृते ऋतपथे त्वयि रामकृष्णे।
मर्त्यामृतं तव पदं मरणोर्मिनाशं
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥३ ॥

**पदच्छेदः–** तेजः तरन्ति तरसा त्वयि तृप्ततृष्णा रागे कृते ऋतपथे त्वयि रामकृष्णे। मर्त्यामृतं तव पदं मरणोर्मिनाशं तस्मात् त्वम् एव शरणं मम दीनबन्धो ॥

**अन्वयः–** ऋतपथे रामकृष्णे त्वयि रागे कृते त्वयि तृप्ततृष्णाः तरसा तेजः तरन्ति; मर्त्यामृतं तव पदं मरणोर्मिनाशं (भवति)। तस्मात् हे दीनबन्दो त्वम् एव मम शरणम्।

**पदपरिचयः–**

| | | |
|---|---|---|
| ऋतपथे | – | [ऋतस्य पन्थाः, ऋतपथः (षष्ठीतत्पुरुषः)[१६]। ऋतपथ] (विशेषणम्। सप्तम्याम् एकवचनम्) |
| रामकृष्णे | – | [रामकृष्ण] (विषयाधिकरणे सप्तम्याम् एकवचनम्) |
| त्वयि | – | [युष्मद्] (विशेषणम्। सप्तम्याम् एकवचनम्) |
| रागे | – | [राग] (विशेषणम्। सप्तम्याम् एकवचनम्) |
| कृते | – | [√कृ+क्त, कृत] (भावलक्षणसप्तम्याम् एकवचनम्)[१७] |
| त्वयि | – | [युष्मद्] (अधिकरणम्। सप्तम्याम् एकवचनम्) |
| तृप्ततृष्णाः | – | [तृप्ता तृष्णा येषां ते तृप्ततृष्णाः। (बहुव्रीहिः)[१८]। तृप्ततृष्ण] (कर्तरि प्रथमायां बहुवचनम्) |
| तरसा | – | [अव्ययम्] |
| तेजः | – | [तेजस्] (कर्मणि द्वितीयायाम् एकवचनम्) |
| तरन्ति | – | [√तॄ] (लटि (वर्तमानकाले) प्रथमपुरुषे बहुवचनम्) |
| मर्त्यामृतं | – | [मर्त्ये अमृतम् मर्त्यामृतम् (सप्तमीतत्पुरुषः)। मर्त्यामृत] (विशेषणम्। प्रथमायाम् एकवचनम्) |
| तव | – | [युष्मद्] (सम्बन्धे षष्ठ्याम् एकवचनम्) |
| पदं | – | [पद] (कर्तरि प्रथमायाम् एकवचनम्) |

[१६] ऋक्पूरब्धूःपथामनक्षे (अष्टाध्यायी ५.४.७४) इति सूत्रेण पथिन् इत्यतः अ-प्रत्यये पथ इति भवति
[१७] यस्य च भावेन भावलक्षणम् (अष्टाध्यायी २.३.३७)
[१८] अनेकम् अन्यपदार्थे (अष्टाध्यायी २.२.२४)

मरणोर्मिनाशम् – [मरणम् एव ऊर्मिः मरणोर्मिः (अवधारणापूर्वपद-कर्मधारयः)। मरणोर्मिं नाशयति। मरणोर्मि (उपपदम्) √नश्+अण्[१९]] (विधेयविशेषणम्। प्रथमायाम् एकवचनम्)

**पदार्थाः–** ऋतपथे (सत्यप्राप्तेः अध्वभूते) रामकृष्णे त्वयि रागे (अनुरागे) कृते (सति मानवाः) त्वयि (रामकृष्णे) तृप्ततृष्णाः (प्राप्तकामाः) तरसा (शीघ्रम्) तेजः (संसारदुःखं) तरन्ति (अतिक्रामन्ति); मर्त्यामृतम् (अनित्ये जगति अमृतसदृशं) तव पदं (चरणं) मरणोर्मिनाशं (मृत्युरूपतरङ्गनाशकम्) (भवति); तस्मात् इत्यादि पूर्ववत्।

**भावार्थः–** हे रामकृष्ण! सत्यप्राप्तेः मार्गस्वरूपे त्वयि प्रीतिं कृत्वा जनाः त्वयि एव सर्वान् कामान् अवाप्य विगततृष्णाः भूत्वा अतिशीघ्रं संसारचक्रम् अतिक्रामन्ति। अनित्ये जगति अमृतसमानं तव श्रीचरणं मृत्युतरङ्गस्य नाशकं भवति। तस्मात् त्वम् एव मम आश्रयः, उद्धारकर्ता भवसि।

कृत्यं करोति कलुषं कुहकान्तकारि
ष्णान्तं शिवं सुविमलं तव नाम नाथ।
यस्मादहं त्वशरणो जगदेकगम्य
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥४ ॥

**पदच्छेदः–** कृत्यं करोति कलुषं कुहकान्तकारि ष्णान्तं शिवं सुविमलं तव नाम नाथ। यस्मात् अहं तु अशरणः जगदेकगम्य तस्मात् त्वम् एव शरणं मम दीनबन्धो ॥

**अन्वयः–** नाथ तव कुहकान्तकारि शिवं ष्णान्तं नाम कलुषं कृत्यं सुविमलं करोति। जगदेकगम्य, यस्मात् अहं तु अशरणः (भवामि) दीनबन्धो तस्मात् त्वम् एव मम शरणम्।

**पदपरिचयः**

नाथ – [नाथ] (सम्बोधने प्रथमायाम् एकवचनम्)
तव – [युष्मद्] (सम्बन्धे षष्ठ्याम् एकवचनम्)
कुहकान्तकारि – [कुहकस्य अन्तः कुहकान्तः। कुहकान्तं कर्तुं शीलम् अस्य। कुहकान्त (उपपदम्) √कृ+णिनि[२०]। कुहकान्तकारिन्] (विशेषणम्। प्रथमायाम् एकवचनम्)
शिवं – [शिव] (विशेषणम्। प्रथमायाम् एकवचनम्)
ष्णान्तं – [ष्ण अन्ते यस्य तत् ष्णान्तम्। ष्णान्त] (विशेषणम्। प्रथमायाम् एकवचनम्)
नाम – [नामन्] (कर्तरि प्रथमायाम् एकवचनम्)
कलुषं – [कलुष] (विशेषणम् द्वितीयायाम् एकवचनम्)
कृत्यं – [√कृ+क्यप्[२१]। कृत्य] (कर्मणि द्वितीयायाम् एकवचनम्)
सुविमलं – [अत्यन्तं विमलम् (प्रादिसमासः)। सुविमल] (विधेय-विशेषणम्। द्वितीयायाम् एकवचनम्)
करोति – [√कृ] (लटि (वर्तमानकाले) प्रथमपुरुषे एकवचनम्)

[१९] कर्मण्यण् (अष्टाध्यायी ३.२.१)
[२०] सुप्यजातौ णिनिस्ताच्छील्ये (अष्टाध्यायी ३.२.७८)
[२१] विभाषा कृवृषोः (अष्टाध्यायी ३.१.१२०)

| | | |
|---|---|---|
| जगदेकगम्य | – | [√गम्+यत्[२२]=गम्य। एकः च असौ गम्यः च एकगम्यः (तत्पुरुषः)[२३] जगतः एकगम्यः जगदेकगम्यः (षष्ठीतत्पुरुषः)। जगदेकगम्य] (सम्बोधने प्रथमायाम् एकवचनम्) |
| यस्मात् | – | [यद्] (हेतौ[२४] पञ्चम्याम् एकवचनम्) |
| अहं | – | [अस्मद्] (कर्तरि प्रथमायाम् एकवचनम्) |
| तु | – | [अव्ययम्] |
| अशरणः | – | [अविद्यमानं शरणं यस्य अशरणः (बहुव्रीहिः)[२५]] (कर्तरि प्रथमायाम् एकवचनम्) |

**पदार्थाः–** नाथ (हे प्रभो) तव कुहकान्तकारि (मायानाशकं) शिवं (मङ्गलमयं) ष्णान्तं (ष्ण-इत्यन्ताक्षरविशिष्टं) नाम (अभिधानं) कलुषं (पापं) कृत्यं (कर्म) सुविमलं (निर्मलं) करोति। हे जगदेकगम्य (पृथिव्या अनन्य आश्रयभूत), यस्मात् (यतः) अहं तु अशरणः (निराश्रयः) तस्मात् इत्यादि पूर्ववत्।

**भावार्थः–** हे प्रभो, तव मायापहारकं मङ्गलमयं ष्ण-इत्यक्षरेण समाप्यमानं रामकृष्ण इति नाम समस्तं पापकार्यं निर्मलं कर्तुं शक्नोति। हे जगतः अनन्य आधारभूत, अहं तु निराश्रयः अस्मि। तस्मात् त्वम् एव मम आश्रयः, उद्धारकर्ता भवसि।

। । ।



[२२] पोरदुपधात् (अष्टाध्यायी ३.१.९८)
[२३] पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन (अष्टाध्यायी २.१.४८)
[२४] विभाषा गुणेऽस्त्रियाम् (अष्टाध्यायी २.३.२५)
[२५] नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्च वक्तव्यः इति वार्तिकेन समासः

श्रीमहेन्द्रनाथगुप्तविरचितम्

# श्रीश्रीरामकृष्णकथामृतम्

## अनुवादकः– स्वामी वेदार्थानन्दः

काशीपुरोद्याने श्रीयुक्तनरेन्द्रप्रभृतिभक्तैः सह, नरेन्द्राय भक्तिज्ञानयोगयोः समन्वयोपदेशः।[१]

फाल्गुनशुक्लषष्ठीकः

## प्रथमपरिच्छेदः

ठाकुरः श्रीरामकृष्णः काशीपुरोद्याने सभाप्रकोष्ठे भक्तैः सह समुपस्थितः। रात्रिः। प्रायेण अष्टवादनं स्यात्। प्रकोष्ठे नरेन्द्रः, शशी, मास्टरः[२], वृद्धगोपालः, शरत्[३] च। अद्य बृहस्पतिवासरः १२९२ तमस्य बङ्गाब्दस्य फाल्गुनस्य अष्टाविंशं दिनम्। फाल्गुनमासस्य शुक्लषष्ठी तिथिः। १८८६-तमस्य क्रिस्तुवर्षस्य मार्च्-मासस्य एकादशं दिनम्।

ठाकुरः रुजति। कञ्चित् कालं शयानो वर्तते। भक्ताः पार्श्वे उपविष्टाः सन्ति। शरत् समुत्थितः सन् वीजयति। ठाकुरः रोगविषये कथयति।

**श्रीरामकृष्णः–** "भोलानाथस्य सविधं गम्यते चेत् तैलं दास्यति। अपि च कथङ्कारं तल्लेपनीयमिति स बोधयिष्यति।"

**वृद्धगोपालः–** "एवञ्चेत् श्वः प्रातर्वयं गत्वा आनयामः।"

**मास्टरः–** "अद्य कोऽपि गच्छति चेत् स बोधयेत् खलु।"

**शशी–** "अहं गन्तुं शक्नोमि ।"

**श्रीरामकृष्णः–** (शरदं दर्शयन्) – "स गच्छतु।"

शरत् कियतिचित् समयेऽतीते दक्षिणेश्वरमन्दिरस्य कर्मचारिणः[४] श्रीमतो भोलानाथमुखोपाध्यायस्य सकाशात् तैलम् आनेतुं गतः।

ठाकुरः शेते। भक्ताः निश्शब्दम् उपविशन्ति। ठाकुरः झटिति उत्थाय[५] उपाविशत्। नरेन्द्रम् अभिसम्बोध्य भाषते।

**श्रीरामकृष्णः–** (नरेन्द्रं प्रति ) – "ब्रह्म अलेपम्। त्रयो गुणाः तस्मिन् सन्ति । किन्तु तद् निर्लिप्तम्।"

"यथा वायौ सुगन्धो दुर्गन्धश्चेति द्वयमपि अनुभूयते। किन्तु वायुः निर्लिप्तः[६]। काश्यां शङ्कराचार्याः पथा

---

[१] १२९२-तमबङ्गाब्दस्य फाल्गुनस्य अष्टाविंशं दिनम्। फाल्गुनशुक्लषष्ठी तिथिः। १८८६-तमक्रिस्तुवर्षस्य मार्च्-मासस्य एकादशं दिनम्।

[२] मास्टर् (Master) इत्यस्य तु अर्थबुद्ध्या आचार्यः इत्यनुवादः चिकीर्षित आसीत्। तथाऽपि संज्ञाबुद्ध्या यथामूलमेव अत्रापि प्रयुज्यते। विभक्तियोजने सौकर्याय अकारान्तत्वं सम्पादितम्। सकारस्य षत्वं बलादेव निरुद्धम्, सकारश्रवणस्यैव अभीष्टत्वात्।

[३] स्वामी सारदानन्दः (१८६५-१९२७)। पूर्वाश्रमे श्रीमान् शरच्चन्द्रः चक्रवर्त्ती। पुरुषविशेषस्य संज्ञेति अत्र शरद् इत्यस्य पुंलिङ्गता। ऋतुविषयकश्चेदेव (i.e. autumn) यथाप्रसिद्धि स्त्रीलिङ्गं स्यात्। रूपाणि तु समानानि।

[४] मूलस्थस्य —मुहुरी (a clerk ) इति शब्दस्य स्थाने कर्मचारी इतीह प्रयुक्तम्।

[५] —शय्यातः पूर्वकायमुत्थाप्य' इत्येतावदेव विवक्षितम्, न तु पद्भ्यां स्थितिं कृत्वेति।

[६] नैयायिकादीनां लोकदृष्ट्यनुसारिणां दार्शनिकानां मतेनापि गन्धः पृथिवीगुणः, न स वायोः स्याद् इत्येतदपि प्रसङ्गतः स्मर्तव्यम् ।

गच्छन्ति स्म। चण्डालो मांसभारं वहन्नागतः सहसाऽस्पृशत्। शङ्कराः अवदन् – कथम् अस्पृशः![७] चण्डालोऽवदत् – भगवन्, न त्वं माम् अस्पृशः, न वाऽहं त्वाम् अस्पृशम्! आत्मा निर्लिप्तः। त्वं स एव शुद्ध आत्माऽसि ।"

"ब्रह्म च माया च। ज्ञानी मायां सन्न्यस्यति।"

"माया आवरणरूपा। इह पश्यत[८], अनेन अङ्गवस्त्रेण[९] अन्तरालं करोमि। नेदानीं प्रदीपालोको दृश्यते।" ठाकुरः अङ्गवस्त्रं स्वस्य भक्तानाञ्च मध्येऽगृह्णात्। वदति – "इह पश्यत, मम मुखं न सम्प्रति दृश्यते।"

"यथाऽवादीद् रामप्रसादः[१०] – मशकजालम् उद्धृत्य पश्य..."

"भक्तस्तु मायां न परित्यजति। महामायां पूजयति। शरणागतः सन् वदति – —मातः, मार्गं देहि। त्वयि मार्गाद् अपसृतायां ब्रह्मज्ञानं भवेद्' इति। जाग्रत्, स्वप्नः, सुषुप्तिश्चेति तिस्रोऽवस्थाः[११] निराकुर्वन्ति ज्ञानिनः। भक्तास्तु इमाः सर्वाः अवस्थाः अङ्गीकुर्वन्ति – यावद् —अहम् 'अस्ति[१२] तावत् सर्वमस्ति।"

"यावद् —अहम् अस्ति तावत् पश्यति यत् माया, जीवजगत्[१३], चतुर्विंशतिः तत्त्वानि चेत्येतत् सर्वं स एवाभवद् इति!"

नरेन्द्रप्रभृतयः तूष्णीं वर्तन्ते।

"मायावादः शुष्कः। किमवदम्, वद तावत्।"

**नरेन्द्रः–** "शुष्कः।"

श्रीरामकृष्णो नरेन्द्रस्य मुखहस्तं स्प्रष्टुम् आरभत[१४]। पुनरपि कथयति – "इदं सर्वं (नरेन्द्रगतं) भक्तस्य लक्षणम्। ज्ञानिनस्तु लक्षणमन्यत् – मुखं शरीराकृतिश्च शुष्कं[१५] भवति।"

"ज्ञानी ज्ञानलाभात् परमपि विद्यामायाम् आश्रित्य स्थातुं क्षमते – भक्तिः, दया, वैराग्यञ्च इत्यादिकं सर्वम् आश्रित्य स्थातुं क्षमते। अस्य उद्देश्यद्वयम् – प्रथमं तावत् लोकसङ्ग्रहो भवेदिति, द्वितीयन्तु रसास्वादनार्थम्।"

"ज्ञानी यदि समाधिस्थः सन् तूष्णीं वर्तेत तर्हि लोकसङ्ग्रहो[१६] न भवति। अतः शङ्कराचार्यैः —विद्याया अहम्' आश्रितः।"

"अपि च ईश्वरानन्दस्य भोगाय – सम्भोगाय – भक्तिभक्तादिकम् आश्रित्य वर्तते।"

"एष —विद्याया अहम्', एष —भक्तस्य अहम्' – नैतस्मिन् दोषोऽस्ति। —कुलीनोऽहम्' इत्यस्मिंस्तु दोषो भवति। तस्य दर्शने जाते बालकस्येव स्वभावो भवति। —बालकस्य अहम्' न कस्मैचिद् दोषाय। तद्यथा दर्पणगतं मुखं – न जनान् भर्त्सयते। दग्धा रज्जुः दर्शने हि रज्ज्वाकारा। फूत्कारमात्रेण सा विशीर्यते। ज्ञानाग्निना अहङ्कारो दग्धः। अथ कस्याप्यनिष्टं स न करोति। नाममात्रेण —अहम्'।"

---

७ त्वमिति कर्ता ।

८ न केवलं नरेन्द्रं प्रति, अपितु सर्वान् भक्तान् उद्दिश्य इदमुच्यत इत्यर्थं गृहीत्वा यूयमित्यत्र कर्ता कृतः।

९ अङ्गवस्त्रम् इत्येतत् "गाम्छा" इत्यस्य स्थाने प्रयुक्तम्।

१० श्रीमान् रामप्रसादसेनः (अष्टादशशतकीयः) – शाक्तसिद्धो विश्रुतो भक्तराट्। श्रीकालीभक्तैः सश्रद्धं सेवितानां बहूनां बाङ्लागीतानां कर्ता।

११ कर्मणि द्वितीयाविभक्तिः बोध्या।

१२ अत्र अहमिति शब्दः सर्वप्राणिनाम् अन्तःकरणगतस्य अहम्भावस्य वाचकः, अनुकृतिसिद्धः। अतोऽस्य प्रथमपुरुषत्वम्।

१३ —जीवानां जगद्' इति व्याख्येयम्, जडतत्त्वानां पृथग्ग्रहणात्।

१४ आरभत, आरभेताम्, आरभन्त, इत्यादीनि रूपाणि लङि।

१५ "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" (अष्टाध्यायी १.२.६९)। इतश्च - —शुष्कं मुखं, शुष्का च शरीराकृतिः' इत्यत्र —इदं शुष्कम्' इत्येकवचनं वा, —इमे शुष्के' इति द्विवचनं वा प्रयोक्तुं शक्यम्। लिङ्गन्तु नपुंसकमेव।

१६ मूले तु "লোকশিক্ষা" इति।

"नित्यप्राप्तेः परं पुनः लीलायां स्थितिः। यथा परं पारं गत्वा पुनः एतत्पारं प्रति आगमनम्, लोकसङ्ग्रहार्थम्, अपि च विलासार्थम् – आमोदार्थम्।"

ठाकुरः अतीव मृदुस्वरेण भाषते। कियत्कालं तूष्णीम् अभवत्। पुनरपि भक्तान् वदति – "शरीरस्यायं रोगः। किन्तु अविद्यामाया न प्रभवति![१७] पश्य तावत् रामलालः, गृहम्, कुटुम्बम्[१८] – किमपि मम मनसि नास्ति। कोऽसौ पूर्णः कायस्थः[१९] तस्य कृते चिन्तयामि? न तु तेषां कृते चिन्ता भवति!"

"स एव विद्यामायाम् न्यक्षिपत्[२०] – लोकहिताय, भक्तहिताय।"

"किन्तु विद्यामायाऽस्ति चेत् पुनरागन्तव्यं भवति। अवतारादि विद्यामायाम् आश्रयति[२१]। स्वल्पाऽपि वासना वर्तते चेत् आगन्तव्यं स्यात्। पुनः पुनरागन्तव्यं स्यात्। सर्ववासनाक्षये मुक्तिः। भक्तास्तु मुक्तिं नेच्छन्ति।"

"यदि काश्यां कस्यापि देहत्यागो भवेत् तर्हि मुक्तिर्भवेत् – न पुनरागन्तव्यम्। ज्ञानिनां मुक्तिः।"

**नरेन्द्रः–** "तद्दिने महिमचक्रवर्त्तिनो[२२] गृहं वयम् अगच्छाम।"

**श्रीरामकृष्णः–** (सहासम्) – "ततः?"

**नरेन्द्रः–** "स यथा शुष्कज्ञानी नान्यो दृष्टः!"

**श्रीरामकृष्णः–** (सहासम्) – "किमभवत्?"

**नरेन्द्रः–** – "गीतम् आलप्यतामिति अस्मान् अवोचत्। गङ्गाधरः[२३] अगायत् –

श्यामनाम्नाऽऽगतप्राणा पश्यतीतस्ततः सखी।
दृश्यते तु तमालाख्यः पादपः पुरतस्तया॥[२४] इति।

गीतं श्रुत्वाऽब्रवीत्[२५] – "कुतस्तावद् ईदृग् गीतम्? प्रेमादिकन्तु न रोचते[२६]। किञ्च सपुत्रकलत्रं निवसामि। तदीदृशं गीतमत्र कुतः?"

**श्रीरामकृष्णः–** (मास्टरं प्रति) – "भयं पश्यति नु?[२७]"

। । ।

---

[१७] मूले "শরীরের এই রোগ – কিন্তু অবিদ্যামায়া রাখে না" इत्यस्ति।

[१८] मूले "পরিবার" इति। अतः पत्नी इत्यर्थोऽपि सम्भवति।

[१९] श्रीमान् पूर्णचन्द्रघोषः (१८७१ - १९१३) विवक्षितः। मूले "কে না পূর্ণ কায়েত..." इति।

[२०] मयि इति शेषः। मूले "তিনিই বিদ্যামায়া রেখে দিয়েছেন" इत्यस्ति। परमात्मविषयाद् अन्यत्र तु ईदृशानां मूलगतानां पूजनार्थकप्रयोगानां बहुवचनकरणेन अनुवादः कृतः, यथा शङ्कराचार्यविषये। तथैव संस्कृतेऽपि परम्परा। परमेश्वरस्य देवादीनाञ्च विषये पूजार्थे बहुवचनप्रयोगः संस्कृते न प्रायिकः।

[२१] उभयपदित्वेऽपि इह परस्मैपदप्रयोगः तात्पर्यविशेषस्य व्यञ्जनाय।

[२२] श्रीमान् महिमचरणः चक्रवर्त्ती (जन्मवर्षादि अनुपलब्धम्), श्रीरामकृष्णदेवे भक्तिमान् कश्चिद् आस्तिकः।

[२३] स्वामी अखण्डानन्दः (१८६४-१९३७)। पूर्वाश्रमे श्रीमान् गङ्गाधरः गङ्गोपाध्यायः।

[२४] यथामूलं प्रतिपदानुवादस्तु – "श्यामनाम्ना प्राणान् प्राप्य इतस्ततः पश्यति। सम्मुखे तमालवृक्षः दर्शनस्य विषयीभवति॥"

[२५] महिमचक्रवर्त्ती इति शेषः।

[२६] मह्यम् इति शेषः ।

[२७] दृशिँर् प्रेक्षणे। लुङि मध्यमपुरुषे रूपाणि – अद्राक्षीः, अद्राष्टम्, अद्राष्ट।

# श्रीशिवमाहात्म्यम्

## प्रलयनन्दी

चिराय मग्नः खलु तत्समाधौ सृष्टेः स्थितेश्च प्रलयस्य कर्ता।
त्वां शम्भुमीशं धृतसर्वलोकं नमामि मूर्ध्ना च कृपामृताय॥
देवैर्यथा तत्तव दर्शनं च सिद्धैस्तपोभिः सुलभं हि लोके।
कदा भवेत्तन्मम शान्तिदायि दम्भस्तु चूर्णीक्रियते च येन॥
तपोभिरीड्यैः किल मोक्षदात्रीं कृपासुधां यां मुनयो लभन्ते।
बिन्दुश्च तस्या भव मेऽस्ति काम्यो येनैव शान्तिर्भविता चिराय॥
गजाजिनादीन् कृतभस्मलेपं दृष्ट्वा च ये वायुपहास्यमानाः।
ते मर्त्यलोके खलु वर्तमाना द्रुमा हि वै पुष्पफलेन हीनाः॥
श्मशानवासः खलु तेऽपवादः जनैश्च मूर्खैरसमाप्तदर्पैः।
तेषां समेषां कथमेव भूयान्मोहान्धकारे स्थगनाद्विमुक्तिः॥
विलासजाले खलु विद्यमानः स्मर्ता न वै ते बत सोऽहमस्मि
भक्तिश्च तस्मान्न दृढा प्रति त्वामवेहि मां देव दयाविहीनम्॥
कायेन वाचा शरणागतस्य महेश्वर त्वं हि दयासमुद्रः।
तवाशिषा सर्वसुखानि देव प्राप्तानि भक्त्या स्तुवता जनेन॥
तवैव नामोच्चरतश्चिराय तवैव मूर्त्तिं स्मरतश्चिराय।
ध्यानेन वा ते रमतश्चिराय ध्रुवं भवेद्वै यमभीतिमुक्तिः॥
प्रलयघटनहेतुः सच्चिदानन्दरूपः सकलसुरगणानां देव एवैक ईड्यः।
जननमरणचक्रभ्रंशदक्षस्त्वमीश त्वथ निखिलजनानां सिद्धिरूपः शरण्यः॥
तव सकलगुणानां नास्ति पारं भवेश हृदयपरमशान्तिप्राप्तये वर्ण्यते वै।
मम मनसि स किञ्चिद्भाति सर्वस्तुतीनां तदपि तव कृपायै स्तूयसे वाधमेन॥

। । ।

# नीलमाधवः

शुभजित्दासः

आसीत् उज्जयिन्यां प्रजावत्सलः धर्मगतप्राणः भक्तप्रवरः इन्द्रद्युम्ननामकः नृपतिः। एकदा भगवतः नीलमाधवस्य दर्शनमात्रेणैव संसारसागरात् मुक्तिर्भवति इति कस्माच्चित् धर्मात्ममुखात् श्रुतः राजा तदनुग्रहवशाच्च भगवद्दर्शनाय वरं लब्धवान्। परन्तु भगवान् नीलमाधवः कस्मिन् प्रदेशे विराजते इति राज्ञा अविदितम् आसीत्। अतः भगवत्-अनुसन्धानम् आरब्धम्। अनुसन्धानाय मुख्यरूपेण राजपुरोहितः विद्यापतिः नियुक्तः आसीत्। केचन धूर्तसभासदः पुरस्कारलोभेन विद्यापतेः गमनात् प्रागेव अनुसन्धानाय प्रस्थिताः। विद्यापतिः महान् भगवद्भक्तः, अतः सः राज्ञः अतिप्रियः विश्वास-भाजनम् आसीत्। स तु एकस्मिन् शुभे दिने भगवन्तं सम्पूज्य राजाज्ञानुसारेण तदनुसन्धानाय प्रस्थितः। एवं वत्सराणि व्यतीतानि, सर्वे विफलमनोरथाः सभासदः राजभवनं प्रत्यवर्तन्त। परन्तु राजपुरोहितः विद्यापतिः न प्रत्यवर्तत इति राजा आशाहीनः न सञ्जातः। अन्यसभासद्भिः चिन्तितं यत् अभुक्तः विद्यापतिः व्रजन् मृतः उत पशुभिः भुक्तः। विद्यापतिस्तु देशान्तरम् अतिक्रम्य सायं नीलगिरिपर्वतं सम्प्राप्तः। समग्रं दिवसं व्रजन् श्रान्तः क्षुधापीडितः सः अनतिदूरे एकं पर्णकुटीरं दृष्टवान्। कुटीरं प्राप्य तेन तत्र मनोहररूपा, सुपरिच्छदा एका शबरकन्या दृष्टा। श्रान्तः विद्यापतिः तां कन्यां सुमधुरवचनैः स्वपरिचयं ज्ञापितवान्। कन्यया पृष्टेन तेन एतदपि सूचितं यत् सः भगवतः नीलमाधवस्य अन्वेषणाय समागतः। सा कन्यापि स्वपरिचयं प्रकाशयन्ती उक्तवती– अहं शबरराजस्य विश्वावसोः कन्या ललिता अस्मि। मम पिता विश्वावसुः परमवैदूर्यमयस्य परमेश्वरस्य नीलमाधवस्य एकनिष्ठः सेवकः। प्रत्यहं भगवतः नीलमाधवस्य सेवार्चनया मत्पित्रा समग्रा रात्रिः व्यतीयते। भवता सम्यगेव श्रुतं परन्तु भगवतः नीलमाधवस्य दर्शनं साधारणैः अशक्यम्, इतोऽपि भवान् अपरिचितः। अतःपरं गृहं प्रत्यागतः विश्वावसुः ब्राह्मणातिथेः सत्कारार्थं स्वकन्यां नियुक्तवान्। पितृवाक्यानुसारं ललितापि परमयत्नेन, आनन्देन, श्रद्धया च अतिथेः सत्कारं कृतवती। विद्यापतिस्तु स्वमधुरव्यवहारेण क्रमशः शवरराजस्य अनुगतः विश्वासभाजनं सञ्जातः। परन्तु व्यतीतेषु अपि दिवसेषु स्वाभीष्टसिद्ध्यभावात् आसीत् सः विचलितमनाः। भक्तश्रेष्ठाः भगवत्प्राप्त्यर्थं स्वजीवनमपि कदाचिदुपेक्षन्ते। एवं सः बुद्धिमान् विद्यापतिः एकदा शवरराजसमीपे ललितायाः पाणिप्रार्थनां कृतवान्। ततः सम्मते शबरराजे शुभसन्ध्यायाम् एकस्यां तयोः विवाहः सम्पन्नः। ललितापि तस्यां रात्रौ विद्यापतिं नील-माधवस्य साक्षात्कारं कारयिष्यतीति प्रतिश्रुतिं दत्तवती। प्रतिज्ञानुसारेण वस्त्रावृतचक्षुः विद्यापतिः एकस्मिन् दिवसे पत्न्या ललितया साकं भगवतः नील-माधवस्य दर्शनाय प्रस्थितः। विवाहात्परं स्वदेशाचाररूपेण ललिता विद्यापतेः कटिदेशे सर्षपपूर्णं झौलिकमेकं पूर्वमेव स्थापितवती। बुद्धिमता विद्यापतिना तु प्रस्थानात्प्रागेव पत्न्याः अज्ञाते सर्षपझौलिकस्य अधः छिद्रमेकं स्थापितम्। बहुपरिश्रमेण पर्वतमार्गेण गच्छन्तौ तौ एकदा लक्ष्यस्थले उपनीतवन्तौ। तदा ललितया कृतानावृतचक्षुः विद्यापतिः दृष्टवान् पुष्करपलाशकुसुमशय्याशयितः त्रिभुवनपालकः परमकृपासिन्धुः भगवान् नील-कान्तमणिः नीलमाधवः समग्रपर्वतकन्दरमलंकृत्य विराजते। विद्यापतिस्तु भगवद्दर्शनेन आत्मानं कृतार्थजन्म इति मत्वा भगवन्तं सहस्रशः प्रणतितितिं निवेदितवान्। ततः भगवत्साक्षात्कारेण तृप्तमनाः विद्यापतिः पूर्ववत् पत्न्या ललितया साकं गृहं प्रत्यागतवान्। एवम् अभीष्टसिद्धेः अनन्तरं विद्यापतिः पत्नीं ललितामाश्वास्य स्वदेशमुज्जयिनीं प्रस्थितः। राजा इन्द्रद्युम्नस्तु विद्यापतेः सर्वं निशम्य त्वरितमेव तेन साकमुत्कलं निर्गतः। भगवान् नीलमाधवस्तु एतावता शबरराजम् आदिष्टवान् यत्– “ अद्यावधिः अहं त्वत्सकाशात् नीलमाधवरूपेण पुजामगृह्णां

परन्तु इतःपरमहं दारुब्रह्मरूपेण समग्रजगज्जनैः पूजितः भविष्यामि” इति। राजा तु विद्यापतिना साकं शबरराजगृहं गतवान्। क्रमशः वर्षर्तोः आगमने पूर्वं गमनसमये विद्यापतेः झौलिकात् पतिताः सर्षपाः कुसुमरूपेण मार्गचिह्नं रचितवन्तः। विद्यापतिः तेनैव मार्गेण लक्ष्यस्थलं प्राप्तवान्। इतःपरं स्वप्नादिष्टः राजा इन्द्रद्युम्नः भगवदादेशानुसारेण मन्दिरं निर्माय दारुब्रह्मणः नीलमाधवस्य प्रतिष्ठां कृतवान्। ततः परमेश्वरस्य नीलकान्तमणेः नीलमाधवस्य दारुब्रह्मरूपेण जगत्यस्मिन् पूजा प्रचलिता। एवं पापप्रभाविते अपि अस्मिन् कलौ परमवैदुर्यमयः परमकृपासिन्धुः नीलकान्तमणिः भगवान् नीलमाधवः स्वभक्तानां स्वदर्शनाकूतानां पतितानामुद्धरणाय दारुब्रह्मरूपेण स्वमायावैचित्र्यमहिम्ना अद्यापि पुरीधाम्नि विराजते।

। । ।

# आरोही

## शान्तनुनायेकः

वसन्तकालः। कार्यं कुर्वन् विरक्तः अभवम्। तस्मात् कार्यं त्यक्त्वा समीपस्थायाः नद्याः पार्श्वे उपविष्टवान्। अकस्मादेका बाला तत्रागत्यावोचत्– “अग्रज, एतानि स्वीकरिष्यति वा। उपायनरूपेण दास्यति।”

दृष्टवान् यत् मलयुक्तछिन्नवस्त्रधारिण्येका बाला करुणदृष्ट्या मम मुखं पश्यन्त्यस्ति। हस्ते वर्तते तस्याः पाटलपुष्पौघः। एताः वस्तुतः मूर्खाः न भवन्ति। अस्मिन् स्वल्पवयसि प्रेमिकायै पाटलपुष्पं प्रदीयते चेत् ताः आनन्दिताः भवन्तीति कथं जानाति। अहं चिन्तितवान् यत् पाटलपुष्पं किं केवलं प्रेमिकायै दीयते ? मात्रे न दीयते वा?

– “कति रूप्यकाणि ?”

– “शतम्।”

अहं धनं निष्काशयाम्यस्मिन् समये आकाशात् वृष्टिरागता। धावित्वाहमेकस्याच्छादनस्य नीचैः आश्रयं स्वीकृतवान्। पश्यामि सा बालापि मामनुसृत्य मम पार्श्वे आश्रयं स्वीकृतवती।

वृष्टिः भवत्यस्ति। एककंसं चायं भवति चेत् सम्यग्भवति। परन्तु कः आनेष्यतीति चिन्तयित्वा तां पृष्टवान्– “तव नाम किम्?”

– “आरोही”

– “अस्त्वारोहि, ते एकं कार्यं दास्यामि शक्नोषि वा?”

– “आम् शक्नोमि। किं कार्यं वदतु?”

– “तत्रैकमापणन्दृश्यते खलु, ततः चायमानेतुं शक्नोषि वा?”

– “आम् शक्नोमि। रूप्यकाणि ददातु।”

कोशाद्विंशतिरूप्यकाणि बहिष्कृत्य तस्यै दत्तवान् उक्तवाञ्च– “किमपि खादितुमिच्छसि चेत् खादितुं शक्नोषि।”

सा धनं स्वीकृत्य धावित्वा चायमाच्छाद्य मम कृते चायमानीतवती। परन्तु सा किमपि न खादितवती। आश्चर्यः सन्नहं तां पृष्टवान्– “आरोहि, किमर्थन्त्वङ्किमपि न खादितवती?”

– “एवमेवाग्रज, अवशिष्टानि रूप्यकाणि स्वीकरोतु।”

समीचीना बालेति विचिन्त्य पृष्टवान्– “त्वं विद्यालयं गच्छसि वा?”

– “नाग्रज, परन्तु विद्यालयस्य छात्राः पुरातनं पुस्तकं क्षिपन्ति चेदहं स्वीकरोमि। तान्येव मध्ये मध्ये पठ्यन्ते मया।”

– “अर्थात्त्वं विद्यालयं न गच्छसि। तव पितरौ... तव पितरौ क्व स्तः?”

– “न स्तोऽग्रज।”

– “न स्त इत्युक्ते? तौ मृतौ वा?”

– “न जाने, परन्तु मम स्वपितरावास्तामिति जानामि। तत्रैकम्मन्दिरन्दृश्यते खलु तस्मिन् मन्दिरे तौ मान्त्यक्त्वा गतवन्तौ। तत्रैका मातागत्य मां स्वीकृतवती। सा मां स्वीकृत्य तस्याः गृहं प्रति नीतवती। तस्याः स्वस्याः अपि त्रयः पुत्राः सन्ति। मम नूतनः पिता प्रायशः मां स्वीकृत्य मात्रा साकं वाग्युद्धं करोति। तस्मात् सापि मान्तत्रैव स्थापयित्वा गतवती यत्र मां स्वीकृतवत्यासीत्। सा माताप्यधुना न दृश्यते।

– “तस्मात्त्वं पुष्पं विक्रीय जीवसि?”

– “नास्त्यग्रज, अस्मात् मार्गात् गम्यते चेदेकमापणम्प्राप्यते। तस्यापणिकस्य सर्वाणि पुष्पाणि


*dipaśikhā*/v1/2022/Santanu Nayek/pp. 14-16

विक्रीणामि चेत् मध्याह्ने भोजनं दास्यति।"

– "मध्याह्ने दास्यति.... तर्हि रात्रौ, प्रातश्च किङ्खादसि?"

– "न खादाम्यग्रज। जलं पीत्वा तिष्ठामि। कदाप्यवकरकण्डोले भोजनमन्विष्य यत् प्राप्यते तदेव खादामि।"

मम नेत्राभ्यामश्रुबिन्दवः पतन्ति। धारयितुं न शक्तवान्। केवलमारोह्येव किम् एवम्प्रकारेण जीवति। अस्यां पृथिव्यामारोहिसदृशाः कति बालाः सन्ति न जानामि? हे भगवन्, पश्यतु भवतः कोमलपुष्पाणि कथं मनुष्यैः दलितानि भवन्ति।

एतावता वृष्टिः न्यूना जाता। तस्याः मलिनशिरसि हस्तं स्थापयित्वा चिन्तितवान् यदेषा बाला कथमभुक्त्वैवादिनं तिष्ठति। तस्मादद्यैतस्यै भोजनं दास्यामि। उक्तवान्– "आरोहि, बुभुक्षा जायते खलु। आगच्छ मया साकं खादितुम्।"

– "कुत्राग्रज?"

– "तस्मिन् आपणे।"

आरोही हसितवती। तत् हसनमहं कदापि न विस्मरिष्यामि। ज्ञात्वाज्ञात्वा वा बहुपापकार्यं कृतवान्। अद्यैतां खादयित्वा किञ्चित् पुण्यकार्यं कर्तुं शक्नोमि।

– "किं खादाम्यग्रज?"

– "त्वं किं खादितुमिच्छसि वद? यदिच्छसि तदेव खादयामि।"

– "अग्रज, बहुदिनं यावत् कुक्कुटस्य मांसं न खादितवती। तस्माद्यदि दीयते..."

पुनः नेत्रे अश्रुपूर्णे जाते। एतावदेव एतस्याः प्रयोजनम्।

– "अस्तु, तदेव खाद।"

तदाहमारोहीं खादयित्वा यां तृप्तिमनुभूतवान् तद् भाषया वक्तुं न शक्यते। इतः पूर्वं सा अनुभूतिः मया न प्राप्तैव।

परस्मिन्नहनि कार्यालयात् बहिर्गतवान् दृष्टवान् यत् सा बीजपूरं हस्ते स्वीकृत्य स्थिता वर्तते। पुष्पं विक्रीय किञ्चिद्धनमधिकं प्राप्तम्। तेनैव धनेन मत्कृते बीजपूरमानीतवती।

– "आरोहि, एवमितःपरं कदापि मा करोतु। अहमादौ बहूनि फलानि खादितवान्।"

– "स्वीकरोत्वग्रज, नो चेदहं कष्टमनुभवामि।"

– "अस्तु, अद्याहं स्वीकरोमि। परन्तु इतःपरं मत्कृते किमपि मा आनयतु। तव मुखं दृष्ट्वा भाति यदद्यापि किमपि न खादितवती। प्रातः किमपि खादितवती वा?"

– "न।"

– "अस्तु, शीघ्रमागच्छ मया साकं खादितुम्।"

तत आरभ्य प्रतिदिनमहं तां खादयामि। सा निषेधं करोति, परन्तु तथाप्यहं खादयामि। सापि मत्कृते नारङ्गकं बीजपूरमित्यादिकं फलमानयति। कियद्दिनादनन्तरं तस्यां मम प्रीतिः आगता। प्रतिदिनं तां पश्यामीति कारणादेकं दिनं सादृष्टा चेत् मम रात्रौ निद्रा न भवति।

फेब्रुयारीमासस्य २२ दिनाङ्कः। रात्रौ चिन्तयन् आसं यत् आरोह्याः कृते वस्त्रं क्रेष्यामि। बहु दिनं यावदेकमेव वस्त्रं परिधाय तिष्ठति। तस्मात् नूतनं वस्त्रं दास्यामि। अकस्मात् मातुः दूरवाण्यागता। माताब्रवीत्– "पुत्र, एका विपदागता। तव पिता कार्यं कृत्वा द्विचक्रिकया गृहमागच्छन् आसीत्। तदा.... तदा एकेन मोटरयानेन तस्य द्विचक्रिका घट्टीकृता। एकः पादः भग्नः जातः। अधुना वयं चिकित्सालये स्मः। त्वं शीघ्रमागच्छ।"

संवादं श्रुत्वा कृच्छ्रमनुभूतम्। परन्त्वारोही.., तां तर्हि कियद्दिनं न द्रक्ष्यामि। गमनात् प्राक् तामेकवारं पश्यामि चेत् सम्यग्भवति।

वस्त्रं सज्जीकृत्य मार्गं प्रति गतवान्। पिता कथमस्ति कः जानाति। वासयानस्य प्रतीक्षायामासम्। तदा दृष्टवान् आरोही किञ्चिद्दूरे स्थिता वर्तते। हस्ते तस्याः वर्तते चकोबार् इति नाम्ना पयोहिमम्। सा मम समीपमागत्योक्तवती– "किञ्चित् स्वीकरोत्वग्रज।"

श्रुतवान् यत् मत्सदृशः कश्चन पागलः एतत्तस्यै दत्तवान्। अहमुक्तवान्– "नास्त्यारोहि, सः प्रीत्या दत्तवान्। अहं न खादामि त्वं खादसि चेदेव मम भोजनं भविष्यति। तस्मात्त्वमेव खाद।"

परन्तु सा नाङ्गीकृतवती। हिमस्य एकस्मात् पार्श्वात् दन्तैः किञ्चित् कर्तयित्वा लेहनं कुर्वन् तामुक्तवान्– "आरोहि, मम पिता चिकित्सालये वर्तते। तं द्रष्टुमहं गृहं गमिष्यामि। तस्मात् कियद्दिनं त्वया साकं दर्शनं न भविष्यति। एतानि त्रिशतं रूप्यकाणि स्वीकुरु। एभिः किमपि खादिष्यसि।"

मार्च्मासस्य तृतीयः दिनाङ्कः। अहं प्रत्यागतवान्। कियद्दिनमारोह्याः दर्शनं न जातम्। तस्मादन्वेषणं कृत्वा आरोही यस्मादापणात् पुष्पमानयति स्म तत्र गतवान्।

– "अत्रारोहीति नाम्ना एका बालिका तिष्ठति स्म। सा कुत्र?"

आपणिकः मम मुखं प्रति करुणदृष्ट्या पश्यन् उक्तवान्– "भवान् किमारोह्याः सोनाग्रजः?"

– "आम्, कुत्र सा?"

अहं दृष्टवान् यत् सः आपणिकः क्रन्दति।

– "महोदय...., सा इदानीं नास्ति अस्यां पृथिव्याम्। फेब्रुयारीमासस्य २३ दिनाङ्के वासयानेन सा घट्टिता। तेन सा दिवं प्राप्तवती।"

अहं क्रन्दितुं न शक्तवान्। परन्तु तदैव अहं वमनं कृतवान्।

– "महोदय, किञ्चिदुपविशतु।"

अहमुपविष्टवान्।

– "एतत् पत्रं स्वीकरोतु। सा मह्यमेतद्दत्वोक्तवती यत् 'यदि मम कदापि किमपि भवति तर्ह्येतत् सोनाग्रजाय ददातु।'"

दृष्टवान् एका रक्तवर्णस्य दिनपञ्जिका। तत्र अस्पष्टतया किमपि लिखितमस्ति। तत्र फ्रेब्रुयारीमासस्य २२ दिनाङ्के यल्लिखितमासीत् तत्र मम दृष्टिः गता। तत्र लिखितमस्ति– "मम सोनाग्रजः अद्य मां त्यक्त्वा गतवान्। तस्मादद्य मम मनः सम्यग् नास्ति। गमनात् प्राक् सः मह्यं त्रिशतं रूप्यकाणि दत्तवान्। अस्मिन् पार्श्वे दिनुपितृव्यस्य माता बहुदिनात् समीचीनं भोजनं याचते। सा वृद्धा अभवत्। तस्मात्तस्यै कोऽपि भिक्षां न ददाति। तद्धनमहं दिनुपितृव्यस्य मात्रे प्रदाय आगतवती। श्वः आरभ्य अहं पुनः पुष्पं विक्रीणामि। अपि च सोनाग्रजः आगच्छति चेत्तमहं वदिष्यामि यत् 'पश्यतु सोनाग्रज भवत्सदृशं प्रेतुमहमपि ज्ञातवती। एतत्तु भवतः एव दानम्, मम सोनाग्रज...।"

। । ।

# मातुः क्रन्दनम्

शुभङ्करदासः

उत्तरदिनाजपुरस्य रायगञ्जमहाविद्यालयस्य छात्रः अमरः। सः अतीव मेधावी, परन्तु दरिद्रः। अमरस्य पिता परलोकं गतः, गृहे केवलं माता, एका अनुजा च अस्ति। अमरः कांश्चन छात्रान् पाठयित्वा स्वपठनस्य रूप्यकाणि अर्जयति। अद्य तस्य स्नातकपरीक्षायाः फलप्रकाशो भविष्यति। राजीवेन दुरवाण्या सूचितं यत् अमरः पूर्ववत्सरवत् अस्मिन् वत्सरेऽपि प्रथमस्थानम् अलंकृतवान्। तथापि अमरः दुःखीव दृश्यते। तस्य मनस्कामः उद्योगलाभः, तेनैव तस्य परिवारस्य दरिद्रता अपाकर्तुं शक्या। तस्मात् सः उद्योगार्थं बह्वीः परीक्षाः अददात्। गतमासेऽपि उद्योगार्थं परीक्षामेकाम् अदात्। ईश्वरकृपया अद्यैव अपराह्णे अमरस्य नाम्ना पत्रमेकम् आगतं यत्र लिखितमस्ति तमुद्योगं सः प्राप्तवान्, कोलकाताशाखायां तस्य कार्यभारः। तस्मात् आगामिनि सप्ताहे एव तत्र गन्तव्यम्। परस्मिन् दिने अमरः रेलयानं गृहीतुं रेलस्थानकं गन्तुं प्रारभते। मार्गे दृष्टवान् क्षतविक्षतमेकं युवकम्। अमरेण सः युवकः चिकित्सालयम् आनीयत। अमरेण घटीं दृष्ट्वा परिलक्षितं यत् इदानीं तु रेलयानं न लभ्यते। तस्मात् चिन्तितं यत् स परश्वः गमिष्यति। चिकित्सकेन सूचितं यत् एषः पादेनैकेन खञ्जः प्राप्ताघातश्च जातः अतस्तस्य विश्रामः आवश्यकः। चिकित्सकः सूचितवान् यदेषः 'माता क्रन्दन्ती, तां रक्ष रक्ष' इति ब्रूवन्नस्ति। अमरः युवकस्यास्य विश्रामाय तं स्वगृहम् आनीतवान्।

परस्मिन् दिने प्रातः अमरेण 'का तव माता, सा क्वाऽस्ति, तस्याः किं जातम्' इत्यादिके पृष्टे सः युवकोऽवदत् भारतभूमिरियं तस्य माता। अस्माकं समाजस्य अवस्थामिमां दृष्ट्वा तेनोक्तं 'माता क्रन्दन्ती' इति। ब्रिटिश्जनानां पाशाद् मुक्तापि सा इदानीं जर्जरितैव। अत्रत्याः जनाः परस्परं युद्धविवादेन भारतं कलङ्कयन्ति, स्वसंस्कृतिं विस्मृत्य पाश्चात्यसंस्कृतिं गृह्णन्ति। किञ्च समाजस्य स्तम्भभूतान् युवकान् केचन राजनेतारः हस्तपाञ्चालिकावत् व्यवहरन्ति। शिक्षालयेऽपि साम्प्रतं प्रथमस्थानप्राप्तये प्रतियोगिता एव चलति न तु शिक्षादानम्। देशमातुरुन्नतये कोऽपि न चिन्तयति, केवलं स्वस्य स्वपरिवारस्यैव चिन्ता तेषां मनसि। ते किं विस्मृतवन्तः वयं सर्वे एकपरिवारस्थाः एव। ते किं त्यक्तवन्तः 'वसुधैव कुटुम्बकम्' इति श्रुतिम्। अधुना कालचक्रस्य एवं परिवर्तनं जातं यत् स्वभ्रातृष्वपि प्रेम नास्ति। एतस्य कारणं सङ्घबद्धाभावः, तदेवोच्यते-'संगच्छध्वं संवदध्वम्' इति। तस्मात् सः युवकः एकं संगठनं निर्मितवान्, यत्र सर्वे सम्मिलन्तः देशहिताय कार्यं कुर्वन्ति स्म। युवकाः ग्रामं ग्रामं गत्वा शिक्षाप्रचारं कुर्वन्तः जीवनं यापयन्ति स्म। परन्तु जाल्मराजनेतारः तत् सोढुम् असमर्थाः सन्तः तत्संगठननाशाय पाशमकल्पयन्। एकस्यां सन्ध्यायां यदा सर्वे सङ्घस्य प्रकोष्ठे कार्यरताः आसन् तदा प्रकोष्ठेऽग्निसंयोगः कृतः। केनचित् प्रकारेण एष युवकः ततः पलायनं कृतवान्। तत्रत्याः सर्वे देशप्रेमिकाः युवकाः वीरगतिं प्राप्तवन्तः। एतच्छ्रुत्वा अमरस्य खेदः जातः, स्वपरिवारं प्राप्तोद्योगं विस्मृत्यैव देशमातुः रक्षणाय तं युवकं जगाद 'तव अवशिष्टकार्यमिदमधुना अहं साधयिष्यामि' ।तदर्थं प्रतिज्ञामपि कृतवान् अमरः। अमरः तं युवकमुक्तवान् 'निर्दिशतु किं करणीयं देशमातुः रक्षणाय' इति। अमरः तस्य युवकस्य निर्देशेन कार्यं करोति यथा रणाङ्गने अर्जुनः कृष्णस्य आज्ञां पालयति तथा। एवमेव अमरः तत्सङ्घं पुनरुज्जीवितमकरोत्। तस्य युवकस्य निर्देशेन संगठनं चालयति स्म। अस्माकं समाजस्य प्रधानव्याधिं निरक्षरतां प्रकृतशिक्षया दूरीकरोति। सा च शिक्षा न केवलं शास्त्रगताऽपि तु चरित्रगठनशिक्षा, या दिक्षु विस्तीर्यते। सङ्घबद्धाः युवकाः धनं दत्वा समाजसंस्कारकार्यं कुर्वन्ति, यथा स्वास्थ्यकेन्द्रनिर्माणं, शिक्षायतननिर्माणम् इत्यादि। एवं प्रकारेण अयं सङ्घः समाजे विख्यातो जातः। सर्वे युवकाः आगत्य



*dipaśikhā*/v1/2022/Subhankar Das/pp. 17-18

तत्र योगदानं कुर्वन्ति स्म। अमरः तत्कार्यभारं सम्प्रति निर्वहति।

एकदा प्रातःकाले सः तं युवकं कुत्राऽपि न प्राप्तवान्। बहु अन्वेषणात् परं तस्य उत्पीठिकायां पत्रमेकं प्राप्तम्। तत्र लिखितस्ति– 'भवता सम्यक् कार्यं कृतं, समाजसेवायै स्वजीवनम् देशस्य कृतेऽर्पितम्। अहं भवतः मनसि देशप्रेमजागरणाय अत्र आगत आसम्। भारतवर्षस्य बहूनि स्थानानि सन्ति यत्र सङ्गठनस्य आवश्यकता अस्ति, तस्मात् इतः गतोऽस्मि'...इति देशमातुरेकः पुत्रः।

। । ।

॥ॐ नमो भगवते रामकृष्णाय॥

# श्रीश्रीरामकृष्णलीलाप्रसङ्गः

ड. राकेशदाशः, शान्तनुनायेकः

## प्रथमः खण्डः (पूर्वकथा बाल्यजीवनञ्च)

### प्रथमः खण्डः - अवतरणिका

## धर्मः एव भारतस्य सर्वस्वम्

भारतस्य तदितरदेशानां च आध्यात्मिकभावानां विश्वासानां च तुलना क्रियते चेत् तत्र महान् प्रभेदः परिलक्ष्यते। परिलक्ष्यते यत्– ईश्वरः, आत्मा, परलोकः इत्यादिषु अतीन्द्रियविषयान् परमसत्यरूपेण प्रत्यक्षीकर्तुम् प्राचीनकालाद् एव भारतवर्षं स्वीयसर्वस्वं नियोजयामास। एवञ्च अयं साक्षात्कारः उपलब्धिः वा वैयक्तिकस्य जातिगतस्य च स्वार्थस्य चरमसीमारूपेण सिद्धान्तितः। अस्य समग्रः प्रयासः केनचिद् अपूर्वाध्यात्मिकभावेन चिरं रञ्जिता विराजते।

## महापुरुषाणां सर्वेषां भारतवर्षे अनवरतम् अवतरणम् एव अस्य कारणम्

अतीन्द्रियेषु सर्वेषु विषयेषु ईदृशस्य ऐकान्तिकस्य अनुरागस्य उपस्थितेः मूलान्वेषणेन अवगम्यते यत् दिव्यगुणयुक्तानां दिव्यगुणसम्पन्नानां साक्षात्कृततत्त्वानां च पुरुषाणां भारतवर्षे नियतम् अवतरणम् एव अस्य केवलं कारणम्। तेषां वैचित्र्यपूर्णदर्शनम् असाधारणशक्तिप्रकाशं च प्रत्यक्षीकृत्य समालोच्य च भारतं तादृशेषु सर्वेषु दृढविश्वाससम्पन्नम् अनुरागसम्पन्नं चाभूत्। इत्थं भारतवर्षस्य राष्ट्रियजीवनम् अतिप्राचीनकालाद् एव आध्यात्मिकतायाः सुदृढभूमिम् अधिष्ठाय, धर्मावाप्तिरूपलक्ष्यम् अनुसन्धाय, अदृष्टपूर्वम्, अभिनवं समाजं, सर्वाः सामाजिकप्रथाश्च असृजत्। जातीयाः समाजस्थाः च प्रत्येकं जनाः निजप्रकृतिगतान् गुणान् आलम्ब्य प्रात्यहिककर्मणाम् अनुष्ठानपूर्वकं क्रमेण उन्नतिम् अधिगम्य अन्ते धर्मलाभं ईश्वरसाक्षात्कारं वा कर्तुं शक्नुवन्ति, भारतीयसमाजः तत्र एव लक्ष्यं स्थिरीकुर्वन् सर्वान् नियमान्, प्रथाश्च सर्वाः व्यवास्थापयन्। पुरुषानुक्रमेण बहुकालं यावत् तादृशानां नियमानां प्रतिपालनेन एव भारतवर्षे सर्वे धर्मभावाः अधुना अपि एतावता प्रमाणेन जीवन्ति। तपः संयमांश्च तीव्रां व्याकुलताम् अवलम्ब्य प्रत्येकं जनः एव जगत्कारणम् ईश्वरं साक्षात्कर्तुं तेन नित्ययुक्तः भवितुं च शक्नुवन्ति इत्यस्मिन् विषये भारतवर्षस्य प्रत्येकं मनुष्यः अधुना अपि दृढं विश्वसन्ति।

## ईश्वरस्य प्रत्यक्षदर्शने एव भारतवर्षस्य धर्मः प्रतिष्ठितः – तस्य प्रमाणम्

श्रीभगवतः दर्शनलाभे एव भारतवर्षस्य धर्मः प्रतिष्ठितः इति सारल्येण अनुमीयते। वैदिककालात् धर्मसंस्थापकान् आचार्यान् वयं ऋषिः, आप्तः, अधिकारी प्रकृतिलीनः पुरुषः इत्यादिभिः यैः शब्दैः निर्दिष्टवन्तः, तेषां शब्दानाम् अर्थानुसन्धानादेव इदम् अनुभूयते। अतीन्द्रियपदार्थानां साक्षात्कारं कृत्वा असाधारणशक्तेः परिचयं प्रदत्तवन्तः इति ते तादृशैः नामभिः निर्दिष्टाः इति तु निश्चप्रचम्।

## भारतवर्षे अवतारविश्वासस्य उपस्थितेः कारणं क्रमश्च। साङ्ख्यदर्शनोक्तम् ‘कल्पनियामकः ईश्वरः’ इति

पुनः वैदिकयुगस्य ऋषिः एव कालक्रमेण पौराणिकयुगे ईश्वरावतारः सम्पन्नः इति बोधे क्लेशः न भवति। कांश्चन मनीषिणः अतीन्द्रियपदार्थानां सर्वेषां दर्शने समर्थान् ज्ञातवन्तः वैदिकयुगीनाः मनुष्याः, तेषु तत्त्वदर्शिषु मिथः शक्तेः तारतम्यं निर्धारयितुम् असमर्थाः सर्वान् अपि तान् मनीषिणः ऋषि-शब्देन विनिर्दिश्य सन्तुष्टाः आसन्। परन्तु काले गते मनुष्याणां बुद्धिः तुलनाशक्तिश्च यथा यथा विकसिता तथा तथा मनुष्याः अवागच्छन् यत्, सर्वे एव ऋषयः समानशक्तिसम्पन्नाः न भवन्ति, आध्यात्मिकजगति तेषां कश्चित् सूर्योपमः, अपरः चन्द्रोपमः, इतरः उज्ज्वलनक्षत्रोपमः, अन्यः सामान्यखद्योतोपमः स्वस्वज्योतिषा विराजन्ते। तदा ऋषीणां तारतम्ये मनुष्याणां प्रयासः उद्भूतः। तेषु कतिपयान् आध्यात्मिकशक्तिप्रकाशे विशेषसामर्थ्यवतः अथवा तादृशशक्तेः विशेषाधिकारिणः निर्धारितवन्तः। एवं दार्शनिकयुगे केचन ऋषयः आधिकारिकपुरुषः इति नाम्ना अभिहिताः अभूवन्। ईश्वरस्य सत्तायां सन्दिग्धः साङ्ख्याचार्यः कपिलोऽपि तादृशानां सर्वेषां पुरुषाणां सत्तायां सन्देहं न प्राचीकटत्। यतः साक्षात्कृते प्रत्यक्षे विषये कः कदा सन्दिहीत? अतः श्रीभगवतः कपिलस्य तदनुसारिणां सांख्याचार्याणां च ग्रन्थे ‘आधिकारिकपुरुषाः’ सर्वे ‘प्रकृतिलीन’-शब्देन अभिहिताः दृष्टाः। तथाविधानां असामान्यशक्तिमतां सर्वेषां पुरुषाणां प्राकट्यहेतुनिर्णये ते अवादिषुः–

पवित्रता-संयमादि-गुणैः भूषिताः पूर्णज्ञानलाभसमर्थाः चेद् अपि तादृशानां सर्वेषां पुरुषाणां मनसि प्रबला लोककल्यानवासना उजागरा तिष्ठति, तस्मात् ते अनन्तमहिममण्डिते स्व-स्वरूपे कञ्चन कालं विलीय स्थातुं न प्रभवन्ति, लोककल्याणवासनया च सर्वशक्तिमत्याः प्रकृतेः अङ्गे विलीय प्रकृतिशक्तिसमुदायम् एव स्वीयां शक्तिं मन्वानाः षडैश्वर्यम् अधिगृह्य कल्पकालपर्यन्तम् अशेषविधया लोककल्याणं संसाध्य कल्पान्ते स्व-स्वरूपम् अधितिष्ठन्ति।

## भक्तियुगस्य महामहिमः ईश्वरः

दार्शनिकयुगस्य अन्ते भारतवर्षे भक्तियुगस्य विस्तारः। वेदान्तस्य डिण्डिमघोषेण भारतभारती सर्वव्यष्टीनां समष्टिभूते ईश्वरे महामहिमशालिनि बद्धादरा सती अनन्यभक्त्या एव तस्य उपासनया एव ज्ञानयोगयः पूर्णताप्राप्तये श्रद्धावती बभूव। अतः साङ्ख्यदर्शनोक्तः ‘कल्पनियामकः ईश्वरः’ नित्यशुद्धबुद्धमुक्तस्वभावस्य महामहिमशालिनः ईश्वरस्य अंशतः पूर्णतः वा प्रकाशः इति प्रतिपादने विलम्बः नाभवत्। एवम् एव पौराणिकयुगे अवतारे विश्वासः आगतः। तदा वैदिकयुगीनः विशिष्टगुणशाली ऋषिः एव ईश्वरावतारः इति अन्वमीयत। एतेन इदं स्पष्टम् अवगम्यते यत्, असामान्यानाम् आध्यात्मिकशक्तिसम्पन्नानां पुरुषाणाम् आविर्भावं दर्शं दर्शम् एव भारतं क्रमेण ईश्वरावतारे बद्धादरम् अभवत्। तथा च, एतेषां मनीषिणाम् अतीन्द्रियदर्शनम् अनुभवादिकं च अवलम्ब्य एव भारतीयधर्मस्य सुदृढं हर्म्यं शनैः शनैः समधिष्ठितं हिमसुशोभितहिमाचलः इव गगनम् अस्प्राक्षीत्। एते सर्वे मनुष्यजीवनस्य उत्कृष्टतमोद्देश्यलाभेन कृतार्था इति मत्वा भारतवर्षे एते ‘आप्तः’ इति संज्ञया विनिर्दिष्टाः, तेषां वाणीषु ज्ञानस्य पराकाष्ठां परिलक्ष्य ताः वाण्यः ‘वेद’शब्देन अभिहिताः।

## अवतारविश्वासस्य कारणान्तरम् - गुरूपासनम्

विशिष्टानाम् ऋषीणाम् ईश्वरावतारत्वेन परिणामस्य अन्यतमं कारणं भारतस्य गुरूपासनप्रवृत्तिः। वेदोपनिषदां कालाद् एव भारतभारती विशेषश्रद्धया ज्ञानदातुः आचार्यस्य गुरोः वा उपासनं कुर्वती

आसीत्। अनया उपासनाप्रवृत्त्या एव ते अवागमन् यत्, मानवस्य अन्तः अतीन्द्रियायाः ऐशशक्तेः आविर्भावः न भवति चेत्, स गुरूपदवीम् आरोढुं न प्रभवति। साधारणस्य मनुष्यस्य जीवने स्वार्थपरतया साकं यथार्थगुरूणाम् अहेतुककरुणया लोकहितसाधनस्य तुलनां कृत्वा आदौ ते विविधासु उन्नतपदवीषु आरोहिताः मानवरूपेण एव पूजिताः भवन्ति स्म। परं यथार्थगुरूणाम् अलौकिकशक्तिप्रकाशस्य साक्षात्करणेन भक्तिश्रद्धास्तिक्यादीनां घनीभवनात् मनुष्यहृदयेषु तेषां देवत्वं सुदृढं प्रतिष्ठितम्। ते अवागमन् यत्, भवरोगात् मुक्तये एतावन्तं कालं श्रीभगवतः करुणापूरितदक्षिणामूर्तेः पुरस्ताद् यत् साहाय्यं प्रार्थितं– "रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्" इति, गुरुणाम् अभ्यन्तरात् सः एव इदानीं पुरस्ताद् उपस्थितः। श्रीभगवतः करुणैव धृतविग्रहा गुरुशक्तिरूपेण तेषां पुरस्तात् प्रकाशितः।

## अवतारवादस्य प्रतिष्ठा वेदः समाधिप्रसूतं दर्शनं च

पुनः गुरोः उपासनायां मानवस्य मनः बहुधा अग्रे सृतम्। यान् आश्रित्य तस्याः शक्तेः विशेषलीला प्रकटिता, तान् एव अविलम्बेन श्रीभगवतः धृतविग्रहां ज्ञानप्रदां दक्षिणामूर्तिं ज्ञातवन्तः। इत्थम् आचार्योपासनं कालक्रमेण भारतवर्षे अवतारवादस्य प्रतिष्ठायां परिपुष्टौ च साहाय्यं कृतवत् इति प्रतीयते। अत एव, अवतारवादस्य स्पष्टाभिव्यक्तिः पौराणिकयुगे उपस्थिता चेद् अपि, तस्य अवतारवादस्य मूलं वैदिकयुगम् अपि अधिकरोति एव इति पुनः न वक्तव्यम्। वेदोपनिषद्दर्शनयुगेषु मनुष्याः ईश्वरस्य गुण-कर्म-प्रकृति-विषयेषु यान् अनुभवान् प्रापन्, पौराणिकयुगे ताः एव सर्वाः व्यक्तीभूय अवताररूपेण अभिव्यक्ताः आसन्। अथवा संयमतपस्यादिसाहाय्येन औपनिषदयुगे मानवः नेति नेति मार्गेण पुरतः गत्वा निर्गुणब्रह्मोपासने साफल्यं लब्ध्वा समाधिजगतः विलोममार्गेण अवतीर्य सर्वं जगत् ब्रह्मणः प्रकाशरूपेण द्रष्टुं समर्थोऽभूत्। तदा सगुणं विराजं ब्रह्म ईश्वरपदवाच्यं प्रति प्रेमभक्तिभ्यां ईश्वरस्योपासने प्रवृत्तोऽभवत्। तदा ईश्वरस्य गुण-कर्म-स्वभावविषये कञ्चन स्थिरसिद्धान्तम् उपनीय धृतविशेषरूपे ईश्वरस्य अवतारे विश्वासम् अकरोत्।

## ईश्वरस्य करुणोपलब्धेः एव पौराणिकयुगे अवतारवादप्रचारः

पूर्वम् एव उक्तं यत्, पौराणिकयुगे एव भारतवर्षे अवतारविश्वासः विशेषरूपेण प्रकटितः आसीत्। तस्मिन् युगे साधनमार्गे अनेकदोषाः प्रकटिताः। किन्तु अवतारमहिमप्रकाशे तस्य वैशिष्ट्यं महत्त्वं च स्पष्टं हृदयङ्गमं भवति। यतो हि अवतारविश्वासम् आश्रित्य एव मानवः सगुणब्रह्मणः नित्यलीलाविलासम् अवगन्तुं समर्थः अभवत्। तस्माद् एव सः अवगतवान् यत्, जगत्कारणम् ईश्वरः एव आध्यात्मिके जगति तस्य अद्वितीयः मार्गदर्शकः। अपि च तस्माद् एव इदम् अपि अन्वभवत् यत्, यावन्तं कालं यावद्दुराचारपरायणः भवेत् नाम श्रीभगवतः अपारकरुणा कदापि विनशमार्गे पुरतः न नेष्यति– किन्तु करुणाविग्रहः सन् प्रतियुगम् आविर्भविष्यति। अपि च मानवस्य स्वभावानुगानां नवनवसाधनमार्गाणाम् आविष्कारपूर्वकं तस्य धर्मलाभे सुगमतां साधयति।

## अवतारपुरुषस्य दिव्यस्वभावविषये शास्त्रोक्तेः संक्षेपः

अमितगुणयुक्तानां सर्वेषाम् अवतारपुरुषाणां दिव्यजन्मकर्मादिविषये स्मृतिषु पुराणेषु च यद् वर्णितं तस्य संक्षेपः अत्र उल्लिख्यते चेद् न दोषावहं भवति। उच्यते, अवतारपुरुषः ईश्वरः इव नित्यशुद्धबुद्धमुक्तस्वभावः। जीवाः इव न कदापि स कर्मबन्धनेन बध्यते। यतो हि, जन्मनः प्रभृति आत्मारामाः इमे पार्थिवभोगसुखलाभाय जीवा इव स्वार्थचेष्टायां न रमन्ते। धृतशरीरस्य तस्य सर्वाः

चेष्टाः लोककल्याणाय प्रवर्तन्ते। न च स कदाचिद् अपि मायायाः अज्ञानबन्धनेन कदापि आबद्धः इति कारणात् पूर्वपूर्वजन्मसु शरीरं परिगृह्य यानि सर्वाणि कर्माणि सः अनुष्ठितवान्, तेषां सर्वेषां स्मृतिः न लुप्यते।

## अवतारपुरुषस्य अखण्डा स्मृतिशक्तिः

प्रश्नः उद्भवति, इयम् अखण्डा स्मृतिः किं तर्हि तस्मिन् आबाल्यं विद्यते? पुराणकाराः कथयन्ति, अन्तःसलिला इयं स्मृतिः बाल्ये न प्रकाशते; परन्तु यथा यन्त्रभूते शरीरमनसी सुविकसिते भवतः तदा स्वल्पायासेन अनायासेन वा इंय स्मृतिः तस्मिन् उदिता भवति। तस्य प्रत्येकं चेष्टायाः विषये एव एतद् अवगन्तव्यम्। मर्त्यशरीरधारणात् तस्य सर्वा चेष्टा सर्वथा मनुष्यसदृशी भवति।

## अवतारपुरुषस्य नवधर्मस्थापनम्

इत्थं कायमनसी यथा यथा पूर्णतां प्राप्नुतः तथैव अवतारपुरुषः तस्य वर्तमानजीवनस्य उद्येश्यं सम्यग्रूपेण अवगच्छति। सः अवगन्तुं शक्नोति यत्, धर्मसंस्थापनायैव तस्य आगमनम् अभूत्। पुनः तस्य उद्देश्यस्य सफलतायै यत् किमपि अपेक्षितं तत् अलौकिकतया तेषां समीपे स्वतः एव समागच्छति। मानवसामान्यस्य समीपे यद् वर्त्म सर्वदा तिमिराच्छन्नम् अनुभूयते, तस्मिन् मार्गे उज्ज्वलम् प्रकाशं दृष्ट्वा निर्भयं पुरस्तात् गच्छति, उद्देश्यलाभेन कृतार्थः भूत्वा जनान् अपि तस्मिन् मार्गे प्रवर्तयति च। तादृशरूपेण मायातीतस्य ब्रह्मस्वरूपस्य जगत्कारणस्य ईश्वरस्य च प्राप्तये अदृष्टपूर्वाः नूतनाः मार्गाः तेन प्रतियुगं पौनःपुन्येन आविर्भवन्ति।

## अवतारपुरुषस्य आविर्भावकालविषये शास्त्रोक्तिः

अवतारस्य गुणकर्मस्वभावादीन् तथा निर्णीय एव पुराणकाराः न प्रतिनिवृत्ताः। तस्य आविर्भावकालः अपि स्पष्टं निरूपितः। उच्यते, सनातनधर्मः सार्वजनीनः। यदा कालप्रभावेन धर्मस्य ग्लानिः भवति; यदा मायाप्रसूतस्य अज्ञानस्य अनिर्वचनीयप्रभावेन मोहितः मानवः इहलोकं तथा पार्थिवं भोगसुखलाभम् एव सर्वस्वं मन्वानः जीवनम् अतिवाहयति; आत्मा, ईश्वरः, मुक्तिः इत्यानीन् अतीन्द्रियान् नित्यान् विषयान् कस्यचन भ्रमान्धस्य युगविशेषस्य स्वप्नराज्यस्थितकवेः कल्पनां मन्यते; यदा छलेन बलेन कौशलेन सर्वविधां पार्थिवसम्पदं, सर्वविधम् इन्द्रियसुखं च लब्ध्वापि सः हृदयस्य अभावं पूरयितुम् अशक्नुवन् शान्तिहीनतायाः अन्धतमसावृते अकूले प्रवाहे निपतति; वेदनया विलपति– तदा श्रीभगवान् स्वीयतेजसा सनातनधर्मं राहुग्रासाद् मुक्तं शशधरम् इव द्योतयति; कृपाविग्रहः सन् दुर्बलं मानवं हस्तग्राहं धर्मस्य मार्गे प्रतिष्ठापयति। विना कारणं कार्यं न उत्पद्यते। इत्थं सार्वजनीनाभावस्य दूरीकरणरूपं प्रयोजनं विना ईश्वरोऽपि कदापि लीलाच्छलेन शरीरं न परिगृह्णाति। किन्तु तादृशः कश्चिद् अभावः यदा समाजस्य सर्वाणि अङ्गानि अभिभवति तदा श्रीभगवतः अशेषकरुणा घनीभूता सती जगद्गुरुरूपेण आविर्भावाय तं प्रवर्तयति। तादृशं प्रयोजनं साधयितुं तादृशस्य लीलाविग्रहस्य पौनःपुन्येन आविर्भावं प्रत्यक्षीकृत्य एव पुराणकाराः पूर्वोक्तं राद्धान्तम् उपनीताः इति पुनः न वक्तव्यम्।


*dipaśikhā*/v1/2022/Rakesh Das, Santanu Nayek/pp. 19-23

## वर्तमानकाले अवतारपुरुषस्य पुनरागमनम्

अत एव नवीनधर्मस्य आविष्कर्ता जगद्गुरुः सर्वज्ञः अवतारपुरुषः युगप्रयोजनानि साधयितुम् एव आविर्भवति। धर्मक्षेत्रं भारतं नानायुगेषु ईश्वरस्य पदाङ्कानि हृदये गृहीत्वा पूता भवति। युगप्रयोजने समुपस्थिते अमितगुणवतः अवतारस्य शुभाविर्भावः अद्यापि दरीदृश्यते। अदूरचतुःशताब्द्याः पूर्वं श्रीभगवान् श्रीकृष्णचैतन्यभारतीरूपेण अदृष्टपूर्वमहिम्ना श्रीहरेः नामसङ्कीर्तनेन उन्मत्तः आसीत् इति सर्वलोकप्रसिद्धम्। पुनः किं सः कालः उपस्थितः? पुनः किं वैदेशिकानां घृणायाः आस्पदभूते, विनष्टगौरवे, दरिद्रे भारतवर्षे युगप्रयोजनम् उपस्थितं येन श्रीभगवान् करुणायाः विषमोत्तेजनेन पुनः सम्प्रति शरीरपरिग्रहं करोति? हे पाठक, अशेषकल्याणगुणवतः यस्य महापुरुषस्य विषये वयम् अत्र वक्तुकामाः स्मः, तस्य जीवनालोचनेन अवगन्तुं शक्यते यद् ईदृशी स्थितिः समागता। श्रीरामचन्द्र-श्रीकृष्णादिरूपेण आविर्भूय यः पूर्वपूर्वयुगेषु धर्मं समस्थापयत्; साम्प्रतिकयुगप्रयोजनं साधयितुं तस्य एव शुभागमनं प्रत्यक्षीकृत्य भारतं पुनः धन्यं संवृत्तम्।

। । ।





*dipaśikhā*/v1/2022/Rakesh Das, Santanu Nayek/pp. 19-23